National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
**NJHSR 2024;** 1(57): 239-241
© 2024 NJHSR
www.sanskritarticle.com

**अविनाशकुमारः,**
शोधच्छात्रः, ज्योतिषविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**अविनाशकुमारः,**
शोधच्छात्रः, ज्योतिषविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# ज्योतिषतत्त्वप्रकाशदिशा षोडशसंस्काराणां वैभवम्

**अविनाशकुमारः**

**दिक्कालाद्यनविच्छिन्नानन्तचिन्मात्रमूर्तये।**
**स्वानुभूत्यैकमानाय नमः शान्ताय तेजसे॥**

सर्वज्ञेन सर्वशक्तिमता परमात्मना सृष्टेऽस्मिन् जगति दृश्यते अनन्तज्ञानम्। तदेव ज्ञानं वेदात्मना प्रसिद्धमपि। तादृशस्य वेदस्य अङ्गभूतेषु षट्सु ज्योतिषस्यापि स्थानमस्तीति सुविदितमेव। यद्वत् सर्वेन्द्रियाणां नयनं प्रधानम्, तद्वत् वेदाङ्गपुरुषस्य अङ्गेषु नयनमुच्यते ज्योतिषम्, तथा हि **ज्योतिषां नयनं चक्षुः** इति प्रसिद्धोक्तिः अस्त्येव।

सम्प्रति ज्योतिषशास्त्रस्य प्रकरणग्रन्थेषु अन्यतमस्य पण्डितलक्ष्मीकान्तकन्यालप्रणीतस्य ज्योतिषतत्त्व-प्रकाशस्य विचारः क्रियते। तस्मिन् ग्रन्थे विशिष्य षोडशसंस्काराणां विषये परामर्शः क्रियते। **संस्कारात् द्विज उच्यते** इत्यतः तेषां संस्कारणां वैभवमत्र पश्यामः।

अस्मिन् ग्रन्थे विषयप्रतिपादनपरम्परायां तृतीयाध्याये षोडशसंस्काराणां वर्णनं दृश्यते। ते च यथा-

**१. गर्भाधानम् -**

**गर्भाधानं पुंसवनं सीमन्तो जातकर्म च।**
**नामक्रिया निष्क्रमणोऽन्नाशनं वपनक्रिया॥**[1]
**कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः।**
**केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः॥**[2]
**त्रेताग्निसंग्रहश्चेति संस्काराः षोडश स्मृताः।**

तत्रादिमः संस्कारः गर्भाधानम्। त्रिप्रकारके गण्डान्ते, जन्मनक्षत्रे, वैनाशिकनक्षत्रे, मूला – भरणी – अश्विनी – रेवती – मघानक्षत्रेषु, ग्रहणदिने, पातके, वैधृतियोगे, मातापित्रोः श्राद्धदिने, परिघयोगे, उत्पाते, हतनक्षत्रे, जन्मराशितः अष्टमराशौ, पापनक्षत्रेषु च गर्भाधानसंस्कारः अशुभ इति ज्ञेयः।

**भद्रा षष्ठी पर्वरिक्ताश्च सन्ध्या**
**भौमार्कार्कीनाद्यरात्रीश्चतस्रः।**
**गर्भाधानं त्र्युत्तरेन्द्वर्कमैत्र-**
**ब्राह्मस्वातीविष्णुवस्वम्बुपे सत्॥**[3]

भद्रायाम्, षष्ठीतिथौ, पर्वणि, रिक्तातिथौ, सन्ध्यायाम्, मङ्गल-रवि-शनिवासरेषु, तथा रजोदर्शनकाले प्रथमचत्वारिदिनेषु गर्भाधानं निषिद्धमस्ति। उत्तरात्रये, मृगशिरा-हस्त-अनुराधा-रोहिणी-स्वाती-श्रवण-धनिष्ठा-शतभिषानक्षत्रेषु गर्भाधानसंस्कारः शुभकरः।

**२. पुंसवनम् -**

**मूलादित्यशशाङ्कपुष्यहरिभे हस्ते च पुंवासरे**
**लग्ने कुम्भनृयुग्मसिंहगुरुभे नन्दे सभद्रे तिथौ।**
**मासे युग्मतृतीयकेऽथ धवले पक्षे शुभे रात्रिपे**
**कुर्यात्पुंसवनं च वृद्धिसुखदं केन्द्रत्रिकोणे शुभे॥**[4]

मूला-पुनर्वसु-मृगशिरा-पुष्य-श्रवण-हस्तनक्षत्रेषु,पुरुषवासरेषु, कुम्भ-मिथुन-सिंह-धनु-मीनलग्नेषु नन्दा-भद्रातिथिषु, द्वितीयतृतीयमासयोः, शुक्लपक्षे, चन्द्रस्य शुद्धौ, केन्द्रे त्रिकोणे यदा शुभग्रहः भवति

तदा पुंसवनकर्मकरणेन वृद्धिः सुखं च प्राप्यते।

**३. सीमन्तः –**

**चतुर्थे सावने मासि षष्ठे वाप्यथवाष्टमे।**
**अरिक्तापर्वदिवसे कुजजीवार्कवासरे॥[5]**
**सीमन्ते तिष्यहस्तादितिहरिशशभृत्पौष्णविध्युत्तराख्याः**
**सीमन्तलग्नादेकोऽपि क्रूरो व्ययसुताष्टसु।**
**हन्ति सीमन्तिनीं नारीं तद्गर्भं वा न संशयः॥[6]**

चतुर्थ-षष्ठ-अष्टममासान्, रिक्तां पर्वतिथीः त्यक्त्वा मङ्गल-बृहस्परति-रविवासरेषु, पुष्य-हस्त-पुनर्वसु-श्रावण-मृगशिरा-रेवती-रोहिणी-उत्तरात्रयनक्षत्रेषु सीमन्तसंस्कारः शुभदः।

**४. जातकर्म –**

**जन्मतोऽनन्तरं कार्यं जातकर्म यथाविधि।**
**दैवादतीतकालं चेदतीते सूतके भवेत्॥[7]**

जन्मनः पश्चादेव जातकर्मसंस्कारः करणीयः। यदि समयः न प्राप्तः तर्हि जननाशौचस्य अनन्तरं जातकर्मसंस्कारः कर्तुं शक्यः।

**मृदुध्रुवचरक्षिप्रभेष्वेषामुदयेऽपि च।**
**गुरौ शुक्रेऽथवा केन्द्रे जातकर्म च नाम च॥[8]**

मृदु-ध्रुव-चर-क्षिप्रनक्षत्रेषु यदा बृहस्पतिः शुक्रश्च केन्द्रभावे भवतः, तदा जातकर्म अथवा नामकरणसंस्कारः कर्तुं योग्यः।

**५. नामकरणम् –**

**नामाखिलस्य व्यवहारहेतुः शुभावहो कर्मसु भाग्यहेतुः।**
**नाम्नैव कीर्तिं लभते मनुष्यः ततः प्रशस्तं खलु नामकर्म॥**

अतः नामकरणसंस्कारः अवश्यं करणीयः। कदा करणीयम् इत्यत्र आह –

**तज्जातकर्मादिशिशोर्विधेयम्**
**पराख्यरिक्तोनतिथौ शुभेऽह्नि।**
**एकादशे द्वादशकेऽपि घस्रे**
**मृदुध्रुवक्षिप्रचरोडुषु स्यात्॥**

पर्व एवं रिक्तातिथीः त्यक्त्वा शुभवासरे एकादशे अथवा द्वादशे दिने मृदु-ध्रुव-क्षिप्र-चरतारासु नामकरणसंस्कारः विधेयः। यदि उक्तमुहूर्ते केनापि कारणान्तरेण संस्कारः न कृतः तर्हि अष्टादशे अथवा नवदशे उत शतदिनानाम् अनन्तरम्, षाण्मासिक्याम्, उतवा वर्षे वा अवश्यं संस्कारः आचरणीयः। यदि मुख्यसमये संस्कारः क्रियेत, तर्हि शुभतिथिनक्षत्रचन्दादीनां विचारणस्य अपेक्षा नास्ति। अतीते मुख्यकाले तु शुभतिथ्यादीनां विचारः अवश्यः विधेयः। अपराह्ने अथवा रात्रकाले नामकरणसंस्कारः न करणीयः।

**६. अन्नाशनम् -**

अस्य संस्कारस्य अपरं नाम अन्नप्राशनम् इत्यपि वर्तते। यदा शिशुः अन्नखादने योग्यो भवति, तदा अन्नाशनसंस्कारः करणीयः। उक्तं च यथा –

**रिक्तानन्दाष्टवर्जं हरिदिवसमथो सौरिभौमार्कवारान्**
**लग्नं जन्मर्क्षलग्नाष्टमगृहलवगं मीनमेषालिकं च।**
**हित्वा षष्ठात्समे मास्यथ मृगदृशां पञ्चमादोजमासे**
**नक्षत्रैः स्यात्स्थिराख्यैः समृदुलघुचरैर्बालकान्नाशनं सत्॥**

रिक्तां, नन्दां, अष्टमीं, द्वादशीं च तिथीः विमुच्य तथा शनिमङ्गल-रविवासरान्, जन्मलग्नतः अष्टमलग्नम्, मीनमेषवृश्चिकलग्नानि त्यक्त्वा पुत्रस्य षष्ठे मासि सममासे तथा कन्यायाः पञ्चममासतः विषममासे स्थिर-मृदु-लघु-चरनक्षत्रेषु अन्नाशनसंस्कारः शुभावहः।

**७. कर्णवेधसंस्कारः -**

**हित्वैतांश्चैत्रपौषावमहरिशयनं जन्ममासं च रिक्तां**
**यग्माब्दं जन्मतारामृतुमनुवसुभिः सम्मिते मास्यथो वा।**
**जन्माहात्सूर्यभूपैः परिमितदिवसे ज्ञेज्यशुक्रेन्दुवारे-**
**ऽथोजाब्दे विष्णुयुग्मादितिमृदुलघुभैः कर्णवेधः प्रशस्तः॥[9]**

तृतीये अथवा पञ्चमे वर्षे, चैत्रे एवं पुष्यमासे, अवमतिथौ, चातुर्मासे, जन्ममासे, रिक्तातिथौ, समवर्षान् जन्मनक्षत्रं विहाय षट्सप्तमाष्टममासेषु अथवा जन्मदिनात् द्वादशे अथवा षोडशे दिने बुध-बृहस्पति-शुक्र-चन्द्रवासरेषु, विषमवर्षे, श्रवण-धनिष्ठा-पुनर्वसु-मृदु-लघुनक्षत्रेषु कर्णवेधसंस्कारः शुभदः।

**८. चूडाकरणसंस्कारः -**

**चूडावर्षात्तृतीयात्प्रभवति विषमेऽष्टार्करिक्ताद्यषष्ठी**
**पर्वोनाहे वितैत्रोदगयनसमये ज्ञेन्दुशुक्रेज्यकानाम्।**
**वारे लग्नांशयोश्चास्वभनिघनतनौ नैधने शुद्धियुक्ते**
**शाक्रोपेतैर्विमृष्टैर्मृदुचरलघुभैरायषट्त्रिस्थपापैः॥[10]**

तृतीयवर्षात् विषमवर्षे अष्टमी-सप्तमी-रिक्ता-प्रतिपदा-षष्ठीपर्वाणि त्वक्त्वा, चातुर्मास्यं विहाय, उत्तरायणे बुध-चन्द्र-शुक्र-बृहस्पति-वासरेषु, लग्नेशस्य अथवा लग्नस्य नवांशेशः अष्टमस्थाने न स्यात्, अष्टमः शुद्धः स्यात्, ज्येष्ठा-अनुराधनक्षत्रे विमुच्य, मृदु-चर-लघुनक्षत्रेषु तृतीयषष्ठैकादशस्थानेषु यदा पापग्रहः स्यात् तदा चूडाकर्मसंस्कारः माङ्गलिको भवति।

**पञ्चमासाधिके मातुर्गर्भे चौलं शिशोर्न सत्।**
**पञ्चवर्षाधिकस्येष्टं गर्भिण्यामपि मातरि॥[11]**

यदि बालकस्य माता पञ्चमासेभ्यः अधिकं गर्भावस्थायां स्यात् तर्हि चूडाकर्मसंस्कारः अमङ्गलदः। यदि शिशोः आयुः पञ्चवर्षाणि अथवा ततोऽधिकं स्यात्, अथवा माता पञ्चमासानां दौर्हृदिनी अपि स्यात् तदा चूडाकर्मसंस्कारः कर्तुं योग्यः।

**९. अक्षरारम्भः -**

**गणेशविष्णुवाग्रमाः प्रपूज्य पञ्चमाब्दके**
**तिथौ शिवार्कदिग्द्विद्विषट्शरत्रिके रवावुदक्।**
**लघुश्रवोऽनिलान्त्यभादितीशतक्षमित्रभे**
**चरोनसत्तनौ शिशोर्लिपिग्रहः सतां दिने॥[12]**

गणेशस्य, विष्णोः, सरस्वत्याः, लक्ष्म्याश्च पूजनं विधाय पञ्चमे वर्षे, चतुर्दश्याम्, सप्तम्याम्, दशम्याम्, द्वितीयस्याम्, षष्ठ्याम्, पञ्चम्याम्, तृतीयस्यां तिथिषु, उत्तरायणे, लघु-श्रवण-स्वाती-रेवती-

पुनर्वसु-आर्द्रा-चित्रा-अनुराधानक्षत्रेषु चरलग्नं वर्जयित्वा शुभलग्ने, शुभवासरे अक्षरारम्भसंस्कारः विधेयः।

**१०. उपनयनसंस्कारः -**

**गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम्।**
**राज्ञामेकादशे सैके विशामेके यथाकुलम्॥**[13]

ब्राह्मणस्य उपनयनसंस्कारः अष्टमवर्षे, क्षत्रियस्य एकादशे वर्षे, वैश्यस्य द्वादशे वर्षे, एवं सर्वेषां स्वकुलानुसारं करणीयः।

**आषोडशको विप्रो नोपनीयः कदाचन ।**
**क्षत्रियो विंशतेरूर्ध्वं न वैश्यः पञ्चविंशतिः॥**[14]

षोडशवर्षाणामुपरि ब्राह्मणस्य, विंशतिवर्षाणामुपरि क्षत्रियस्य, पञ्चविंशतिवर्षाणामुपरि वैश्यस्योपनयनसंस्कारः कदापि न करणीयः इति मतम्।

**११. केशान्तसंस्कारः -**

**केशान्तः षोडशे वर्षे चौलोक्तदिवसेषु वा।**
**व्रतोक्तदिवसादौ हि समावर्तनमिष्यते॥**[15]

षोडशे वर्षे अथवा चूडाकर्मणि उक्तेषु नक्षत्रेषु, केशान्तसंस्कारः नाम व्रतबन्धस्यानन्तरं केशखण्डनं शुभकरम्। यानि दिनानि व्रतबन्धसंस्कारे उक्तानि तान्येव दिनानि अत्रापि शुभकराणि।

**१२. विवाहविचारः -**

**कुलं शीलं वपुर्विद्या वयो वित्तं सनाथता।**
**गुणाः सप्त वरे यस्मिंस्तस्मै कन्या प्रदीयते॥**[16]

कुलम्, शीलम्, शरीरम्, विद्या, अवस्था, धनम्, प्रभुता एते सप्तगुणाः यस्मिन् वर्तन्ते । तस्मै एव कन्या प्रदेया ।

**ललाटविपुला कुब्जा निर्लज्जासत्यभाषिणी।**
**व्याधिग्रस्ता च हीनाङ्गी स्थूलदीर्घा कलिप्रिया॥**[17]
**अन्धा च बधिरा कन्या दशदोषान् विवर्जयेत्।**

या कन्या सुविशालललाटवती, निर्लज्जा, मिथ्यावादिनी, रुग्ना, विकलाङ्गिनी, बहुस्थूला, अत्युन्नता, कलहप्रिया, अन्धा, बधिरा सा विवाहाय दोषयुक्ता भवति।

**वाग्दानतः पूर्वं विचारः**

**सापिण्ड्यं गोत्रशुद्धिं च शीलं सामुद्रिकाणि च।**
**जातकादिभमेलञ्च वीक्ष्यं वाग्दानतः पुरा॥**[18]

**पञ्च पाणिग्रहे दोषा वर्जनीयाः प्रयत्नतः।**
**दारिद्र्यं मृत्युवैधव्यौ पौंश्चल्यमनपत्यता॥**[19]

सपिण्डता, गोत्रशुद्धिः नाम समानगोत्रं न भवेत्, उत्तमव्यक्तित्वम्, सामुद्रिकम्, एवं ज्योतिश्शास्त्रोक्तनाडीवेधषट्काष्टकादिकं वाग्दानात् पूर्वमेव विचारणीयम्। दरिद्रता, मरणम्, वैधव्यम्, व्यभिचारः, सन्तारााहित्ययोगः इत्येतेषां पञ्चमहादोषाणां विषयेऽपि विचारः करणीयः।

**भार्याभर्तृविनाशयोगाः**
**लग्ने पापा व्यये पापाः पाताले चाम्बरे तथा।**
**भार्याभर्तृविनाशाय भर्ता भार्यां विनाशयेत्॥**[20]

यदा वरकन्ययोः द्वयोः लग्नस्य व्ययस्य च चतुर्थे एवं दशमे स्थाने पापग्रहः स्यात्, तदा पत्नी पत्युः नाशाय भवति, पतिरपि पत्न्याः नाशाय भवति।

**लग्ने व्यये च पाताले यामित्रे चाष्टमे कुजे।**
**भार्या भर्तृविनाशाय भर्ता भार्यां विनाशयेत्॥**[21]

यदा प्रथम-चतुर्थ-सप्तम-अष्टम-द्वादशस्थानेषु मङ्गलः स्यात्, तदा स्त्रीः पत्युः नाशं करोति, पतिः स्त्रियं नाशयति। एनमेव माङ्गलिक-दोषमति वदन्ति।

एवंरूपेण अन्यानपि संस्कारान् अवान्तररूपेण सम्यगभिवर्णयति ग्रन्थकारः। एतावता प्रतिपादितेषु संस्कारेषु ग्रन्थकर्ता अतीवसूक्ष्मया शैल्या विषयप्रतिपादनं कृतवान्। यदि अधिकं विवरणमपेक्षते तर्हि शोधप्रबन्धस्य अवलोकनं करणीयमिति विद्वत्सु विनम्रं विनिवेदनम्।

**संदर्भ सूची**


[1]ज्योतिषतत्त्वप्रकाशः – ३.१
[2]तत्रैव – ३.२
[3]तत्रैव – ३.७
[4]तत्रैव – ३.११
[5]तत्रैव – ३.१३
[6]तत्रैव – ३.१४
[7]तत्रैव – ३.१५
[8]तत्रैव – ३.१६
[9]तत्रैव – ३.२२
[10]तत्रैव – ३.२४
[11]तत्रैव – ३.२६
[12]तत्रैव – ३.२९
[13]तत्रैव – ३.३१
[14]तत्रैव – ३.३२
[15]तत्रैव – ३.७१
[16]तत्रैव – ३.७४
[17]तत्रैव – ३.८०
[18]तत्रैव – ३.८४
[19]तत्रैव – ३.८८
[20]तत्रैव – ३.८६
[21]तत्रैव – ३.८७